[illegible]

[illegible]

[illegible]

[illegible]

मंत्रार्थः

पत्र १९

रामानुजीय अष्टश्लोकी व्याख्या

न १३



श्रीमते रामानुजाय नमः ॥ यः पार्थस्य कृते निरंकुशनिजस्वातंत्र्यमुद्भावितं ॥ सारथ्यं प्रथयां
चकार धरणीभारावतारे हमं मायामाश्रितवैरिणीं व्यघटयच्चक्रेणायः शार्वरीं दर्पाद्
दर्पयापयोनिधिरसौ देवः शुभांशो मुदी ॥ १ ॥ श्रीशठरिपुगुरुकरुणालब्धत्रय्यंतद्
मततत्वार्थः श्रीमान्गोविंदगुरुः कौशिकवंशाब्धिकौस्तुभो जयति । तत्पदपंकज
युगलसेवासंप्राप्तनिखिलनिगमांतः । वितनोम्यष्टश्लोकीविवृतिं सौम्योपयं
त्रदासोहं । श्रियःपतिः परमकारुणिको भगवान्सर्वेश्वरः वैकुंठे तु परे लोके श्रिया
साद्धं जगत्पतिः । आस्ते विष्णुरचिंत्यात्मा भक्तैर्भागवतैः सह इत्युक्तरीत्या वैकुंठाख्ये दि
व्यलोके दिव्यमणिमंडपे शेषपर्य्यंके श्रीभूमिनीलाभिः सह नित्यसूरिभिरनवरतप
रिचर्य्यमाणचरणनलिनो जगत्सर्वमेकातपत्रयन्नासीनो नित्यसूरिताशेषावस्थो
चिताशेषशेषवृत्तैकरतिरूपस्वचरणारविंदनित्यकैंकर्यरूपपरमपुरुषार्थानुभव
योग्यतासत्वेपि । अनादिमायया सुप्तः । अचिदविशेषितान्प्रलयसीमनि संसरतः
करणकलेवरैर्घटयितुं दयमानमना इत्युक्तरीत्या कृतपयान्जंतून्मधूच्छिष्टमग्न
सुवर्णविंदुवत्प्रलयसमये त्रिगुणात्मकप्रकृतिनिमग्नान् भोगमो[illegible]न्यान् ॥

अचिरेण मानवलोकाय अत्यंतदयार्द्रचित्तः मनुर्विचित्रादेहसंपत्तिरीश्वरायनिवे
दितुं पूर्वमेव कृता बुद्धीनहस्तपादादिसंयुता इत्युक्तरीत्या स्वचरणारविंदपरिचर्या
यात्रानुज्ञापयितुं तदुपयोगिनि करणकलेवराणि तेषां प्रदाय ते च करणकलेवरैस्ते
षु विषयांतरप्रवणेषु हर्तुं तमः सदसती च विवेक्तुं ईशो मानं प्रदीपमिव कारुणिको
ददातीत्युक्तरीत्याहितयोपादेयविवेकाय संगोपांगवेदाख्यं शास्त्रं प्रवर्तयामास तत्
स्मिंश्च शास्त्रे तैरज्ञानान्यथाज्ञानविपरीतज्ञानैरन्यथान्यथानीते सति शरीरसंरक्ष
णोपकारीरितात इव स्वशेषभूतचेतनसंरक्षणे स्वप्रयोजनत्वाध्यवसायेन तेषु परम
कृपया सकलशास्त्रार्थसंग्रहेण प्रकाशयितुकामः ॥ स इह संप्रदाये स्वाधिय १
मनघं श्रोत्रियं ब्रह्मनिष्ठं सत्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतं । दं
४ तं भासूयादिमुक्तं जितविषयिगणं दीर्घबंधुं दयालुं स्खालित्ये शासितारं स्वपरहितपरं दे
शिकं भूष्णुरीप्सेत् । सद्बुद्धिः साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी शुश्रूषुस्त्यक्त
मानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः शांतो दांतोऽनसूयुः शरणमुपगतः शा
स्त्रविश्वासशाली शिष्यः प्राप्तः परीक्षां कृतविदभिमतस्तत्त्वतः शिक्षणीयः । इत्या

२ युक्तं श्रीव्यासाचार्यस्वरूपं यथा लोके प्रदर्शयितुं वदरिकाश्रमे नरनारायणात्मना स्वय
2 मेव शिष्यतया आचार्यतया चाविर्भूय चेतनस्वरूपयाथात्म्यप्रतिपादनपरं श्रीमद
ष्टाक्षरं मंत्रं प्राचीकशत्। पुरा मंत्रद्वयं दत्तमन् विष्णुलोके महापुरे। तस्मिन्नंतःपुरे लक्ष्म्यै
मया दत्तं सनातनं लक्ष्म्या लब्धं तया चैवं मंत्ररत्नद्वयं विभो इत्युक्तरीत्या विष्णुलोके
स्थित्वा स्वरूपयाथात्म्यानुरूपोपायोपेयप्रतिपादनपरं द्वयाख्यं मंत्ररत्नं प्राविवृतत्
तदनु द्वापरयुगे भूभारहननिर्हरणाय वसुदेवात् देवकीपुत्र इत्युक्तरीत्या देवकीतनयतयाव
तीर्य शास्त्रावरणोचितवात्सल्यस्वामित्वसौशील्यसौलभ्यादिकल्याणगुणपूर्तिं वि
शुद्धं पार्थसारथ्यं सकललोकसाक्षिकमाचरन्नेव स्वरूपयाथात्म्यानुरूप परमपु
रुषार्थप्रतिपादनपरं चरमश्लोकं प्राविवृतत्। एवं भावता प्रवर्तितेऽपि रहस्यत्रये
गहकलहमंकुरितं भवलोकभोगजननभागधेयपरिपाकवैभवभावितपरमकारु
णिकभगवदवतारो भगवान् समस्तचापल्यकुदृष्टिनिरसनसकलवेदांततात्पर्या
तं विष्कारचिकीर्षया तं विशेषावतारभगवत्पतिवरविजयकालकृतावतारतया
करतलामलकीकृतसंप्रदायिकार्यस्यार्थतत्त्वो भगवान् श्रीमत्पराशरभट्टार्यः सकलचे २

ह

ततोऽखिलजीवविषयासकलशास्त्रसंग्रहत्वेन सर्वदामुमुक्षुभिरनुसंधेयस्याहस्य त्रय
स्य नाथयथामुनयतिवरप्रभृतिगुरुपरंपराप्राप्तमर्थविशेषमष्टभिः श्लोकैर्विवरितुका
मः प्रथमं स्वरूपज्ञानपूर्वकत्वादभीष्टोपायस्वीकारस्य स्वरूपयाथात्म्यप्रतिपाद
नपरं श्रीमदष्टाक्षरमंत्रं चतुर्भिः श्लोकैर्विवृणोति। तत्र सकलवेदसारसंग्रहः प्रणवः त
द्विवरणं मंत्रशेषः अकारस्य नारायणपदेन। उकारस्य नमसा। मकारस्य नारपदेन च वि
वरणात्॥ तथा हि स्मर्यते ऋचो यजूंषि सामानि तथैवाथर्वणानि च सर्वमष्टाक्ष
रांतस्थं यच्चान्यदपि वाङ्मयम् अष्टाक्षरस्तु प्रणवे अकारे प्रणवः स्थितः अकारं तु त्र्य
क्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता। स गुह्योऽन्यः त्रिवृद्वेदो यस्तं वेद स वेदवित्। ॐकारप्रभवा
वेदा ॐकारप्रभवाः स्वराः ॐकारप्रभवं सर्वं जगत्स्थावरजंगमम् इति तद्विवरणरूपां मूल
मंत्रे संग्रहेण लोके स्योपायोपेयस्वरूपस्य विविच्य प्रतिपादनात्। तद्विवरणं तु चरमश्लो
कः तदपेक्षितप्रापकांतरपरित्यागस्य सर्वपापनिवृत्तेश्चाभिधानात्। उकारार्थविषयादी
कार्युक्तार्थांतरवर्णनं मंत्रविवरणांतरम हितानां मनीषिणामिति विवरणालक्ष

व

३

णमभियुक्तोक्तमिहानुसंधेयं अतः सर्वसंग्रहभूतं प्रणवमादौ विवृणोति। अकारार्थो
3 विष्णुरिति श्लोकेन॥ अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृन्मकारार्थो जीवस्त
दुपकरणं वैष्णवमिदं। उकारोनन्यार्हं नियमयति संबंधमनयोस्त्रयीसारस्त्र्यात्मा प्रणव
इममर्थं समदिशत्॥ अत्र तस्य प्रणवस्याकारार्थ इत्यकारोपक्रमात्। ग्रंथादौ निर्वि
घ्नपरिसमाप्तिप्रचयगमनार्थमवश्यं कर्त्तव्यं मंगलाचारयुक्तानामित्यादिश्रुत्याचा
रसिद्धं मंगलमप्याचरितं भवति। तदाहुः। अ इति भगवतो नारायणस्य प्रथमाभिधा
नमस्ति यथा किन्नाम मंगलं न कृतमिति। अथशब्दोपादानादपि मंगलाचरणात्सिद्धिः
अथशब्दोपि पुरुषार्थवाची॥ जगदुदयरक्षाप्रलयकृत् उदयो नित्यनैमित्तिकप्राकृत
रूपेण त्रिविधोत्पत्तिः। रक्षा अनिष्टनिवर्त्तनपूर्वकेष्टप्रापणरूपं मालावतमनुले
कपालनरपतित्वविष्ण्ववतारादिभिः क्रियमाणां बहुविधं रक्षणं। प्रलयोपि नित्यनैमि
त्तिकप्राकृतात्यंतिकरूपेण चतुर्विधो लयः जगतां लोकानां उदयरक्षाप्रलयान्क
रोतीति तथोक्तः यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्य ३
भिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति हंताहमिमास्तिस्रो देवता अनेन जी

वेनानुप्रविश्य नामरूपे व्याकरवाणि । एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्या
वापृथिवी नापो न नक्षत्राणि । अथ पुरुषो ह वै नारायणोऽकामयत । प्रजाः सृजेयेति । ना
रायणात्प्राणो जायते मनः सर्वेन्द्रियाणि चेत्यादिश्रुतेः । विष्णोः सकाशादुद्भूतं जगत्तत्रै
व च स्थितं । स्थितिसंयमकर्त्तासौ जगतोऽस्य जगच्च सः । स एव सृज्यः स च सर्गकर्त्ता स
एव पात्यत्ति च पाल्यते च । ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः । अहं स
र्वस्य जगतः प्रभवः प्रलयस्तथा । कृष्ण एव हि लोकानामुत्पत्तिरपि चाव्ययः । इत्यादिस्मृति
श्चानुसंधेया । एवंभूतो विष्णुर्व्यापनशीलः । श्रीमन्नारायणः विषॢ व्याप्ताविति धा
तुः अकारार्थः अकारस्य वाच्यः अयमाशयः गतिरक्षणहिंसाद्यनेकार्थकादवतेर्धा
तोरेतदर्थे अव्यावि क्षायां अन्येषामपि दृश्यत इति डप्रत्यये टिलोपेन कृतस्य धातुलो
पे प्रत्ययाकार एवशिष्यमाणो लुप्तधातुवाच्यमर्थं त्वयं शक्त्या लक्षणया वा प्रतिपादयति
तत्रोदयस्य चेतनानां स्वस्वपुण्यापुण्यकर्मानुगुणमाबद्धतकरणकलेवरप्राप्तिरूपत्वा
त् धातोर्गत्यर्थे विवक्षया अकारस्योदयकर्तृवाचकत्वं रक्षणार्थविवक्षया कर्तृवाच
कत्वं चेतनगद्दीतदेवमनुष्यादिस्थूलशरीराणां इष्टिव्यसुप्रतीयते इत्याद्युक्तक्रमे

पादेषु प्रमाणमयतइति, अयति धातुनिष्पन्नाकार ॐ प्रत्येकं कल्पनया ६

णतमः श्रुत्वा ध्यायां प्रवृत्तौ प्रलयकरणस्य हि सारूप्यात् । इहं सार्थविवक्षया
प्रलयकर्तृवाचकत्वं च सिध्यति यद्वा अय गतावितिगतिसामान्यवाचिनो ऽयधा-
तोरुत्पत्तिस्थितिनाशपर्याय एवं मनुष्यादिकारणकलेवरप्राप्तिः । अनिष्टनिवृत्ति-
पूर्वकेष्टप्राप्तिकारणावस्थाप्राप्तिरूपगतिविशेषविवक्षया कर्त्तरि क्विपि लोपो
व्योर्वलीति यकारलोपे हृत्वप्रत्ययलोपे आमविधेरनित्यत्वात् नुगभावे च अयतिरू- त्य
पं सिध्यति अतएव शावरभाष्ये प्रमाणाम्मति इति वाक्ये प्रमाणशब्दस्य टावंत-
त्वं न साधुत्वं समर्थितं नन्वेवं जगदुत्पत्त्यादिकर्तृत्वं भगवतो न सिध्येत् तस्यो-
त्पत्त्यादिकर्तृत्वमेव तु सिध्येत् न हि देवदत्तो गच्छतीत्युक्ते अन्यदीयगतिकर्तृ-
त्वं सिध्यतीति चेत् तर्हि सिद्धं नः समीहितं । चिदचिद्वस्तु शरीरकं ब्रह्मैव हि कार्यका-
रणोभयावस्थं जगत् तत्त्वमसि । इदं सर्वं यदयमात्मा अयमात्मा ब्रह्म सर्वं खल्विदं ब्र- ४
ह्म । ब्रह्मदासा ब्रह्मदासाः ब्रह्मेमे कितवा इत्याद्यभेदश्रुतेः नित्यो नित्यानां चेतना-
श्चेतनानां एको बहूनां यो विदधाति कामान् इत्यादि भेदश्रुतेः । यस्यात्मा शरीरं यस्य पृ- थि

वीशारीं इत्यादिघटकश्रुतेः नेह नानास्ति किंचनेत्यादिव्याप्तिरिक्तनिषेधश्रुतेश्चाप्र
तिज्ञादृष्टांतानुपरोधात्। अभिध्योपदेशात् साक्षादुपदेशान्नानात्। आत्मकृतेः योनि
भ गनाच्च एवं च स्वाभिन्नजगदुत्पत्त्यादिकर्तृत्वं भगवत एवेत्यभिन्ननिमित्तोपादानत्वं
भगवतः सिध्यति। अयं च अकारो योगरूढः तत्र योगेन तस्य जगदुत्पत्त्यादिकर्तृत्वा
श्चेतनारूढ्या तु विष्णुवाचकत्वमिति। अत्र यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठि
तः तस्य प्रकृतिलीनस्य यः परः स महेश्वरः परवाच्यत्वेन प्रधान इत्यर्थः। समस्तश
ब्दमूलत्वादकारस्य स्वभावतः समस्तवाच्यमूलत्वात् ब्रह्मणोऽपि स्वभावतः वा
च्यवाचकसंबंधः तयोरर्थात्प्रतीयते। अकारो विष्णुवाचकः। अ इति भगवतो ना
ग रायस्य प्रथमाभिधानमित्यादिकमकारस्य विष्णुवाचित्वे प्रमाणमनुसंधेयं। इश्व
रस्य चेतनसंरक्षणदशायां पुरुषकारसन्निधेरपेक्षितत्वादविनाभावश्च अकारेल
क्ष्मीसंबंधोऽप्यनुसंधेयः। अनन्या हि मया सीता भास्करेण प्रभा यथा। अनन्या राघ
वस्याहं भास्करस्य प्रभा यथा। राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्मनि। अन्येषु चा
वतारेषु विष्णोरेषानपायिनी इत्यादिवचनात्। अथ तत्तावदपदं व्याचष्टे। मकार इति जी

दः बद्धमुक्तनित्यरूपेण त्रिविधश्चेतनो मकारार्थो मकारवाच्यः। अत्र जीव इत्येकवच
नं समष्ट्यभिप्रायेण। नित्यो नित्यानामित्यादिश्रुत्या। नत्वेवाहं जातु नासं। दासभूताः
स्वतः सर्वे ह्यात्मनः परमात्मनः इत्यादिस्मृतिभिश्च जीवानां स्वरूपबहुत्वोपपत्तेः।
मकारस्य पंचविंशाक्षरत्वात्। जीवस्य च पंचविंशोयं पुरुषः पंचविंश आत्मा भवतीत्य
त्युक्तरीत्या पंचविंशतत्त्वत्वात् आत्मा तु मकारेण पंचविंशः प्रकीर्तितः इति स्मरणाच्च म
कारस्य जीववाचित्वं। अत्र केचिदाचार्याः मकारस्य जीववाचकत्वानुगुणां रूपं साधयं
ति। अस्मच्छब्दे मकारात् पूर्वोत्तरयोरस अद इत्यनयोरवयवयोः छांदसे लोपे मकारव्यं
जनमात्रं शिष्यते। अस्मच्छब्दस्य प्रत्यगात्मवाचित्वात् तदवशिष्टस्य मकारस्य जीववाचक
त्वमुपपन्नतरं भवति। अस्मिन्पक्षे अस्मच्छब्दस्य केवलप्रातिपदिकत्वावस्थायां मका
रात्पूर्वोत्तरयोरवयवयोर्लोपे विप्रकृष्टविकृतमनन्यवद्भवति। इत्यायेन। अस्मच्छ
ब्दत्वानपायात् साधुत्वं नौ सत्यां त्वाहौ सौ विति सप्तैण प्रकृतेरहमादेशः। उ प्रथमयोरमि
ति विभक्तेरमादेशश्च प्रसज्यते सुपां सुलुगिति सुपो लुकि क्रियमाणे महत्गौरवं सुबंतत्वा
वस्थायां त्वहमित्यवरूपमिति मकारो वा सिद्धः स्वाद्युत्पत्त्यनंतरं प्रकृतिप्रत्ययोर्विकारांत

ए, वै२

रापत्तेः प्रागेव मकारातिरिक्तस्य सर्वस्यावयवस्य लोपे सति छिन्नमःशरे म इति जीववाच
कमकारात् षष्ठ्युत्पत्त्यसंभवः इति दोषमनुसंधाना केचिदाचार्याः। मनुज्ञाने मसि परिमा
णे मदिहर्षे। इति धातुभ्यो डिप्रत्यये टिलोपे कृत्स्नस्य प्रत्ययलोपे च धात्ववयवभूतमकारा
णां शीघ्रमारणानामिहृतं चेतोपादनं। तथा च ज्ञातत्वाणुपरिमाणत्वानंदगुणकत्वा
दिविशिष्टवस्तुवाचिनो मकारस्य तादृशो जीव एवार्थः। प्रवृत्तिनिमित्ताश्रयस्य शब्द
वाचकत्वादित्याचक्षते। अस्मिन्नपि पक्षे डिप्रत्ययस्य व्याकरणे गणादिषु वा क्वचिदप्य
नुशासनादर्शनात् संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे कार्याद्विप्रादनुबंधमेत
च्छास्त्रमुणादिषु इति कल्याणादिपत्ताश्रयतो विमकारात्स्वाद्युत्पत्तौ मो नो धातोरिति
सूत्रेण मस्य नकारादेशप्रसंगात् इति दोषं पश्यंतः एवं प्रसाधयंत्यस्मदाचार्याः आत्म
नशब्दे छेदो विषये आत्मनादेवेष्टिन्यादिषु अवयवलोपस्य लक्षणप्रत्वादात्मा जीवे धृतौ
देहे स्वे च आत्मा पुरुषः पंचविंश आत्मा भवति इत्यादिषु तस्य जीवे प्रसिद्धिप्राचुर्याच्च
तत्रैवमकारस्यातिरिक्तपूर्वोत्तरावयवलोपे सति मकारव्यंजनमात्रं शिष्यते। तस्मात्स्वाद्युत्प
त्तौ हल्ङ्याब्भ्यादिलोपः धातुमकारत्वाभावाच्च तत्रैव मकारस्य [illegible] न पूर्वो न नकारादेशः

६ तथाच नित्यो नित्यानां १ श्रोगुणः आत्मा चेतसा वेदितव्यः। अज्ञायं पुरुषः स्वयं ज्यो
तिः ज्ञानात्येवायं पुरुषः प्राप्यात कर्मणास्तस्य यत्किंचेह करोत्ययं। तयोरन्यः पिप्पलं
स्वाद्वत्ति। दस्यास्ति न तमन्तरेमिपस्यात्मा शरीरस्य छत्येवायं लब्ध्वानंदी भवति विज्ञा
नं यज्ञं तनुते निर्वाणमपरं वायमात्मा ज्ञानमयो मलहत्यादिश्रुतिस्मृतिसिद्धनि
त्यत्वा गुणत्व स्वयंप्रकाशत्व ज्ञातृत्व कर्तृत्व भोक्तृत्व परमात्मशेषत्व तत्पारतंत्र्यत्वा
नंदगुणकत्व ज्ञानानंदस्वरूपत्व लक्षणमात्मत्वं। आत्मशब्द प्रवृत्तिनिमित्तम
कारस्यापि तादृशात्मवाचित्वं। अवर्जनीयं नमः प्रावृत्तमहति षष्ठिविभक्तिरपि मकारा
दुत्पद्यते आत्मा तु समकारेणोत्यादिस्मृतौ। आत्मशब्देन मकारार्थकथनमप्य जीव
स्वरसंभवतीति। अथ चतुर्थ्यकारोपात्तस्थितां लुप्तां तादर्थ्यचतुर्थीं व्याचष्टे। तदुपकरणमिति
विष्णोर्नातं दैस्लवं इदं मकारवाच्यमात्मवस्तु उपकरणप्रवायेत्तयानपुंसकनि
र्देशः। तदुपकरणं तस्याकारार्थस्य विष्णोरूपकरणं शेषभूतं वै स्लवमिति अनेन वि
शेषेणजीवस्य भगवच्छेषत्वे हेतुरुच्यते। सर्वं खल्विदं ब्रह्म तज्जलानीति शांत उपा
सीत मत्तः सर्वमहं सर्वमित्यादिश्रुतिस्मृतिषु तज्जत्वतल्लत्वतदनत्वैत च्छेषत्वप्र ६

तिपादनात् यथा कस्मिंश्चित् देशे स्थितो किंचन देशं कर्षकेभ्यो वपतिपालयति हन्तीति च सति
त्तिमन्योरदृष्ट्वा अयमस्य देशस्य स्वामीति निश्चिनोति। तद्वज्जगत्सृष्टिस्थितिसंहारैर्व्यापा
रैरयं जगच्छेषीति निश्चेतुं शक्यमित्येतदर्थप्रतिपादकं वेदोपनिषज्ज्ञाप्यकारस्मृति
दृष्टोऽनात्र। न चैवं न जायते म्रियते वा विपश्चित् अजो नित्यः शाश्वतोऽयं पुराणः नात्मा
श्रुतेर्नित्यत्वाच्च ताभ्य इत्यादि श्रुतिस्मृतिन्यायविरोधः। तत्र वियदादिवन्नामान्त
रभजनार्हस्वरूपान्यथाभावात्मकोत्पत्त्यादेरेव प्रतिषेधात् ज्ञानसंकोचविका
सात्मकस्वभावान्यथाभावरूपोत्पत्तिरूपकार्यत्वस्य स्वरूपनित्यत्वाविरोधित्वात्। य
थाचैतत्तथा॥ शारीरकभाष्ये स्फुटं। यद्वा तत्र उपकरणमिति पदच्छेदः तन्मकारवा
च्यमिदमात्मवस्तु वैष्णवं विष्णुसंबन्धि उपकरणं शेषभूतं। अस्मिन् योजनाद्व
ये विजीवशेषस्यापि द्वस्तुनश्च भगवच्छेषत्वमर्थसिद्धं। अथवा तन्मकारवाच्यं
चैतन्यवस्तु इदं तज्ज्ञानादेर्भोगस्यानन्तभोगोपकरणात् योपस्थितमशुद्धसत्त्वमिश्रसत्त्व
सत्त्वशून्यरूपेण त्रिविधमचिद्वस्तु वैष्णवमुपकरणमिति योजना। न चाचेतनस्य
कथं भगवदनन्यार्हशेषता। तद्विभागवदनन्यस्य चेतनस्यापि शरीरेन्द्रियात्मनाशे

७ षमृतं। अत एव द्वौ सुपर्णौ सयुजौ सखायौ समानं वृक्षमिति। समाने वृक्षे पुरुषो नि
मग्नः इत्यत्र शरीरस्था चेतनस्य जीवेश्वरयोः साधारण्यं श्रूयते। इति। उच्यते
दि अचेतनमपि चेतनवदेव भगवता। एवं लीलोपकरणतया अनन्यार्हशेषभूतं चे
तनशेषत्वं तु तस्य कर्मोपाधिकृतम्॥ चेतना नाम नादिजन्मार्जितपुण्यापुण्य
रूपकर्मानुगुणेन भगवत्संकल्पेन भोग्यभोगोपकरणभोगस्थानतामासाद्य
वर्द्ध भगवतो लीलारसं निष्पादयति। यथा कारागृहमपराधिचेतनस्यापराधा
फ नुरूपफलभोगस्थानतयावस्थितमपि राज्ञ एव अनन्यार्हशेषं तद्वत्। अत एव सर्वा
सनाकर्मनिवृत्तौ तेषामचित्संबंधो निवर्तते। भगवतस्तु न कदाचिदपि तत्संबंधनि
वृत्तिः॥ अथ लिंगतयानु तस्य नु तत्संपर्कं सतद्रूपसंबंधयति। वैश्वरूपमिदमित्यनें
नरं इति तु पञ्चचतुर्थीं प्राहेति शेषः। अहमपि नमम भगवत एवाहमस्मि यस्या!
स्मिन्ततमं तरेमि यस्यात्माशरीरं। स्वत्वमात्मनि संजातं स्वामित्वं ब्रह्मणि स्थि
दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः। कृत्स्नस्य हि कृते मतमिदं विश्वं चरा
चरमित्यादिश्रुतिस्मृतिशतं। परान्तु तच्छ्रुतेरिति शेषत्वकार्यामृतपारतं ७

स्यपुल्लिपादकं भगवद्द्वादशनामसूत्रं चास्मिन्नर्थे प्रमाणतयानुसंधेयं ॥ अत्र भागव
२त तशेषत्वमंशेन भागवच्छेषत्वासिद्धेर्भागवतशेषत्वमप्यप्रसिद्धं । अस्मिन्नर्थे
न्यग्रोधबीजे वटवत्प्रणवे शब्दजालवत् । सिद्धे तदीयशेषत्वे सर्वार्थाः संभवंति
हि । ममभक्तभक्तेषु प्रीतिरभ्यधिका यतः । तद्भृत्यभृत्यपरिचारकभृत्यभृत्येत्या
दीन्युपबृंहणवचनानि । भगवदीयानि श्रीमदष्टाक्षरार्थस्य मयाधिगते
र्थस्त्वद्दासजनशेषत्वमित्यादि श्रीपराशरसूक्तिश्च प्रमाणान्यनुसंधे
यानि । ननु कथमत्र चतुर्थ्याः प्राप्तिः कथं तस्याः लोपः उच्यते ब्रह्मणे त्वा मह
स ओमित्यात्मानं युंजीतेत्यनुष्टेयार्थप्रकाशके मंत्रे अकारार्थस्य ब्रह्मणे
इति चतुर्थ्यन्तेन ब्रह्मशब्देनोक्तत्वात् । अकारविवरणपरेनारायणपदे ।
तादर्थ्ये चतुर्थीदर्शनाच्च नारायणपदे मंत्रद्वादशाक्षरादपि तादर्थ्ये चतुर्थी
वक्ष्यत इति वाल्मीकेन शेत्वापरपर्यायतादर्थ्यचतुर्थी प्राप्ता । सा च प्रणवस्य
छंदोरूपत्वात् लुक्छंदसीति पूर्वविदसतोत्यादि सूत्रेणाच्छंदोविषयेण लुप्ता ॥

८

अथ उकारार्थमाह । अकारादिति । काराः वर्णारसार्थी । स देवानि स्तद्वायुस्तस्मा
यस्तदु चंद्रमाः स देवं सूतं तदुभयमाहुरद मित्यादेव कारस्थाने उकारस्य प्र
योगात् । तेनोंकारः अनयो मकाराकारवाच्ययोः जीवपरमात्मनोः संबंधोऽशेषशे
षिभावरूपः । अनयाहं अन्येषां भगवति ति शिक्षानां ब्रह्मरुद्रादिदेवतानां तदितरासां देव
तानां नरम ज्ञातरसाधनांतरप्रयोजनांतरपराणां देहात्माभिमानिनां स्वस्वातंत्र्या
भिमानिनां चेतनानां तद्व्येषभूतानां चेतनानां च अर्हः योग्यो न भवति यस्मात् या
नियमयति शिक्षयति अथ देवर्षिभूतात्मनृणां पितृणां न किंकरो नायमृणी
च राजन् । सर्वात्मना यः शरणं शरण्यं नारायणं लोकगुरुं प्रपन्नः । कमलनयन
वासुदेव विष्णो स्वपुरुषमभिवीक्ष्य पाशहस्त मित्याद्यनुसंधेयं । केचिदाचार्यास्तु
अगतः परयोर्योरामः सीता मध्ये सुमध्यमा । लक्ष्मणस्तु धनुष्पाणिः पृष्ठतोऽनुज
गाम । इत्युक्तरीत्या रामलक्ष्मणयोर्मध्ये सुमध्यमा लक्ष्मणस्तु धनुष्पाणिः पृष्ठ
तोऽनुज सीतावस्थानवत् मंत्रः प्राप्य प्रजापतिरोविकांतरामानुरवस्थानवद् ८

हं

श्री

अकारमकारमध्ये उकारो लक्ष्मीरुच्यते तथा च तत्र लक्ष्मीशेषत्वमविशारमेव। अ-
कारेणोच्यते। विष्णुरित्यादिस्मरणादित्याह। अस्मिन्पक्षेऽवधारणमर्थसिद्धं॥ अप्
भक्षो वायुभक्ष इत्यादिवत्। भगवदादिशेषत्वादविग्रन्यशेषत्वनिवृत्तेरेवावश्यक-
त्वेन प्राधान्यादवधारणार्थं चमेव प्रयुक्तमिति तु संप्रदायः। एवं प्रणवस्य पदार्थो नु-
न क्तः। अथ प्रणवस्य स्वरूपकथनपूर्वकं तस्य वाक्यार्थमाह। त्रयीसार इति। त्रय्या ऋग्य-
जुस्सामरूपवेदत्रयस्य सारः स्थिरांशभूतः त्रीणि अक्षराण्यात्मा स्वरूपं यस्य सः
त्र्यात्मा। अकार उकार मकाररूपः त्र्यर्थः। तथा हि श्रुतेः। भूरिति ऋग्वेदादजायत। यं
त्यादि। अकार उकार मकार इति। तानेकधा समभवत्। तदेतदोमिति। तथा च म-
नुः अकारं चाप्युकारं च मकारं च प्रजापतिः वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति चे-
ति। तथा चाकारोकारयोः संध्यक्षरे कृते ओमिति प्रणवस्वरूपं सिध्यति। इदमेव सं-
क्षिप्य कारणमभिप्रेत्य ओमित्येकाक्षरं ब्रह्मेति शास्त्रे प्रणवस्यैकाक्षरत्वप्रसिद्धिरपि।
यत्तु पाणिनेरुणादिषु अवतेष्टिलोपश्चेति सूत्रेण। अव रक्षण इति धातोर्मन्
प्रत्ययमुत्पाद्य तस्यापि लोपः छ्वोः शूडनुनासिके चेत्यूठादेशं च कृत्वा ओमिति

२

प्रणवस्वरूपनिरूपणादूर्ध्वं तत्प्रणवस्वरूपव्याख्यानमात्रपरतया नोक्तार्थत्रयपरास्त
रत्रयसमुदायरूपतां वदच्छ्रुतिस्मृतिसिद्धान्तनिरूपणाद्विरुद्धाभिधानमपि वाक्यविरोधा
धिकरणन्यायेन बाधिष्यते। एवंरूपः प्रणवः ॐकारः इमं पूर्वोक्तमर्थं चेतनो भग
वदनन्यार्हशेष इत्येवंरूपमर्थं समदिशत्। सम्यगादिशत्। मुखवृत्त्या प्रत्यपा
दयत् इत्यर्थः। ननु ओमित्येकाक्षरं ब्रह्म यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्ष
रेण परं पुरुषमभिध्यायीत ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् इत्यादि
वाक्यपर्यालोचनया प्रणवस्य ब्रह्मपरत्वं प्रतीयते। कथं तस्य जीवः परमात्म
शेष इत्येतदर्थप्रतिपादनपरत्ववर्णनं। तथात्वे जीवप्राधान्यं प्रणवस्य प्रसज्ये
त इति चेत्। मैवं राजपुरुषवाक्यवत् शाब्दप्राधान्येन जीवपरस्यापि तस्यार्थ
प्राधान्येन ब्रह्मपरत्वोपपत्तेः। अयमेवार्थः प्रणवविवरणभूतेन मंत्रशेषेण
मकारवाच्यो नारायणस्यैव शेषभूतः नमनेत्येवं शेषत्वप्रतिपादनपरः एवं स्व
निवृत्तिरूपपारतंत्र्यपर्यंतप्रतिपादनेन विशदीक्रियत इति कृत्स्नोपि मंत्रार्थः चे
तनस्य भगवदनन्यार्हशेषत्वप्रतिपादनपर एवेत्यनुसंधेयम्। २ एवं प्रणव

२

व्याख्याय ॐ नमः श्राद्धं व्याचष्टे ॥ मंत्रब्रह्मणि मध्यमेन नमसा पुंसः स्वरूपं गति
र्गेयं श्रायि तमास्ति तेन पुनतः पश्चाद्रूपिस्यान ततः । स्वातंत्र्यं निजरक्षणं समुचितं ना
र्हस्त्वं नान्यो स्ति नानस्येवेति हरेर्विविच्य कथितं स्वस्यापि नार्हे ततः ॥ २ ॥ इत्यादि मं
तारं त्रायंते इति मंत्राः ते च भगवन्मंत्रा एव तेषां वोकायवयवा येषो स्यात् । पांचरा
त्र न वाऽजाम्नि लमस्तादशादिषु वाच्यानेकपेक्षेण भगवन्मंत्रा एव तेषां वोकाव
न्नाम्नामेवात्तकत्वं सुप्रसिद्धं तेषु ब्रह्म श्रेष्ठं तस्मिन् मंत्रब्रह्मणि मंत्रराजे श्रीमद्
ष्टाक्षरे । भगवन्मंत्रा हि द्विविधाः । अव्यापका व्यापकाश्च तत्राव्यापकाः कृष्णमंत्र
रूपः तेषु साकल्येन कल्याणगुणानामप्रतिपादनात् । व्यापकास्तु विष्णुगायत्र्यां
समस्ताना नारायण वासुदेव विष्णु मंत्रास्तत्र समस्तकल्याणगुणानामप्रतिपाद
नात् । तेष्वपि नारायणमंत्रः श्रेष्ठः ॐ व्याहारनेकपेक्षेण तत्र कल्याणगुणप्रति
पादनात् । इतरयोस्तु तत्प्रतिपादकार्थे भगवद्व्याहारस्यापेक्षितत्वात् । विष्णुगा
यत्र्यां तत्पूर्वमपठितत्वात् तदेव महर्षिर्व्यासः प्याचाख्येयति गृह्णाति शाख्या ॥ एव
मायतिशयं द्योतयति ब्रह्मशब्दः तदेष्ठं चोपजुषि मा माति । मंत्राणां परमो मंत्रः । य

१०

यासदेंषु देवेषु। भूत्वोर्द्धबाहुः प्रोक्तं सर्ववेदांतसारार्थः अन्ते विषाणाः शिथिला अभी
ता। नारायणेति शब्दोस्ति। किं तत्र बहुभिर्मंत्रैः किमिमे अर्थ्यैः सांकेत्यं पारिहास्यं वा।
इत्यादिवचनशतमेतत्समानार्थाः। अपराकृष्टापरकालगाथा अनुसंधेयाः।
मध्यमेन प्रणवेन नारायणपदयोरंतराले स्थितेन देहलीप्रदीपन्यायात्। पार्श्व
रूपान्तं च ययोर्गयतानेन विशेषतो न संबध्यते। तेन रूपोत्तरखंडस्य नमो व्यावृत्तिः।
पुरस्तात् प्रणवेद्वितारस्थितस्य संज्ञाईत्तितं। तेनान्वितेनेत्यर्थः। सकर्मकात्।
कर्तरि क्तप्रत्ययोऽसंभवात् काकाक्षिन्यायद्योतनापेक्षितशब्दः। नममानमः
पदेन इष्टितमीश्वरतां नपुंसके भावे क्तः ततीयाचकारो नमः पदं द्विविधं अखं
ड नमः इति पदरूपात्मकं सखंडं च तत्राखंडनमपदमुपायवाचि गच्छध्वमेन
शरणं शरणं पुरुषर्षभाः इति मार्कंडेयेनोपदिष्टस्योपायस्य यथोपदेशमनुष्ठा
नप्रतिपादके। द्रौपद्या सहिताः सर्वे नमश्चक्रुर्जनार्दनमिति वाक्यउपायवाचकं
शरणपदस्थानेन नमः शब्दप्रयोगात् सखंडनमपदे मः इति षष्ठ्यंतजीववाचो।
नेतिप्रतिषेधवाचात्रनयोर्द्वयोरपि नमसो मध्ये सखंडस्यैव नमसः स्वतंत्र १०

स्वारूप्यतं त्रैगुणोपादानं। अनेन केषांशवानां आत्यंतसारूप्यात् सहेदुःखाश्रयत्वं च। इयोर्नै
ममेमेध्येसत्वंडस्येव मनसः स्थूलत्रये प्यन्वयः। तत्र प्रमाणान्वितेन नमसा पुंसः चैतनस्य
स्वरूपं प्रणाशेकशेषस्वरूपप्रशिष्टितत्रशोभितम् कथमिति चेतदुच्यते। ममता च द्विविधा।
अहंकारः ममकारश्च। अहं ममेत्यहंकारः। इदं ममेति ममकारः। अहंकारश्च द्विविधः। दे
हात्माभिमानः स्वातंत्र्याभिमानश्च। ममकारोपि द्विविधः। देहानुबंधिभोग्यभोगोपकर
णादिषु ममेति बुद्धिः। आत्मातिशयाधायकेषु पारलौकिकफलतत्साधनेषु ममेति बुद्धि
श्च॥ तत्र देहात्माभिमानरूपोहंकारः तदनुबंधी विषयममकारश्च प्रणवे प्रथित
मकारेण ज्ञानगुणाकत्वादिवाचिना आत्मनो देहातिरिक्तत्वप्रतिपादनात्। निरस्तौ स्वा
तंत्र्याभिमाननिबंधनममकारो द्विविधः पारलौकिकफलतत्साधयोः। स्वर्गस्वाराज्या
दितत्साधनरूपेण कैंकर्यतत्साधनरूपेण च द्विविधत्वात्। तत्र कैंकर्यसाधन
गोचरममकारो गतिविशेषेण निरस्यते॥ कैंकर्यगोचरममकारस्तु गम्यविशेषेण नि
रस्यते। स्वातंत्र्याभिमानरूपोहंकारः स्वर्गस्वाराज्यादिगोचरममकारश्चात्र निरस्य
ते। अहं ममेति स्वातंत्र्याभिमाननिवृत्तेरेवात्रस्वरूपशिष्टत्वात् तांसुन्नच तुर्थ्याभाव

च्छेषत्वे प्रतिपादिते प्युकारेणान्यशेषत्वनिवृत्ते रुक्तत्वे पि त्र्यन्यशेषत्वस्यानमभूतस्य
स्वस्य स्वार्थत्वरूपस्वातंत्र्यनिरासे पि प्रथमांतमकारोक्त ज्ञातृत्ववलायत्त कर्तृत्व
निमित्तत्वात्। कर्तृत्वस्य च स्वतंत्रः कर्त्तेत्यनुशासनेन स्वातंत्र्यरूपत्वात्। स्वा
तंत्र्य निवृत्तिरूपं स्वरूपशोधनमिह कर्त्तव्यं तत्प्रकारश्चेत्थं। न मम: उं नम इति प्
राम्वये। मकारायैव नमः नेति वाक्यभंगी लभ्यते। अत्र मः इति मादर्थ्ये षष्ठ्याख्य।
स्यस्वार्थत्वमाशंक्य नेति निषेधेन स्वार्थत्वरूपं स्वातंत्र्यं निवर्त्तते। अतः स्वरू
पं शोधितं। स्यानंतः स्वस्थानेनोपायवाचिनाऽखंड नमः पदेनान्विते न नमसा
सखंडेन लभ्यते नेति गतिरुपायः शिक्षिता। कथमिति चेदुच्यते। स्वरक्षणे स्वा
न्वयनिवृत्तिरूपं शिक्षिता। तत्प्रकारश्चेत्थं। सखंडेन नमसा नमो नम इत्यखंडना
मोन्वयेन नमः मः नेति वाक्यभंगी भवति। मम स्वरक्षणाद्योप्रवृत्तिः मः मम न किं
तु भगवत एवेति स्वरक्षणे स्वकर्तृत्वरूपस्वान्वयनिवृत्त्या गतिः शोधिता। पाश्चा
त्यायपदान्वितेन नमसा सखंडेन मम उपायं के कर्य्यं च शिक्षितं कथमिति ११

चेदुच्यते। भगवत्कैंकर्यैस्वार्थत्वबुद्धिनिवृत्तिर्म्यविरोधिनां॥ तत्प्रकारश्चेत्थं। नारा
यणायेत्यनमइतिनमसः सखंडस्य चतुर्थ्यंतनारायणपदान्वये। नारायणाय मः नेति
वाक्यभंगी भवति तत्र चतुर्थ्युक्तभगवत्कैंकर्ये मः नेति स्वार्थत्वनिषेधात्। गम्यांशि
श्रितं। एवं स्वस्वरूपोपायपुरुषार्थाः श्रिताश्रिताः श्रुतयश्चैतास्तत्काममाहुः। स्वातंत्र्य
मित्यादि। प्रणवान्वितेन नमसा प्रणवोक्तशेषत्वप्रत्यनीकं। स्वार्थतया चैतस्य मे
ऽत्तरः पामः स्वतंत्रपतिं विश्वस्यात्मेश्वरमित्यादि वेदान्तेषु स्वतंत्रत्वेन सिद्धस्य
हरेः स्वार्थतया सर्वेश्वरतो विरोधेनोचितमित्यर्थः सिद्धः। अन्यस्य हरेरन्यस्योचितं ने
न्तं। विपरिणामेनान्वयः। अखंडनमोन्वितेन नमसा निजरक्षणं स्वकीयं स
रक्षणं चेतनाभिष्टोपायतातस्या। एवमुत्तमपालरक्षसेतुर्ध्वंसनः। निवासः शर
णसुहृत् गतिर्नारायणा इत्यादिषु सर्वरक्षकत्वेन प्रसिद्धस्य हरेः स्वाश्रितानां विरो
धिनो हरतो निवर्तयतः। अभिरक्षापयतश्च विरोधिवोचितं। नान्योचितं नाराय
णपदान्वितेन नमसा समभ्युच्चिता॥ शेषत्वरूपानुगुणान्हर्तिर्यापाराः चतुर्थ्युक्त

कैंकर्यं तस्य। एष सर्वेश्वरः एष भूताधिपतिः। क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावी
शते देव एकः॥ तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं इत्यादिषु सर्वशे
12 षित्वेन वेदांतप्रसिद्धस्य हरेः। सर्वस्य शेषत्वं यादृशं तो विशोरेवो चिता। नान्योचिता
इति अनेन प्रकारेण विविच्य विभज्य कथितं अभिहितं॥ प्रधानार्थमुपसंहरति। स्व
स्यापीति। ततः हरेः शेषित्वात् हेतोः स्वातंत्र्यादित्रयं स्वस्यापि स्वस्य हरेरेवनार्हे
मुतम् उचितं। स्वहरिसाधारणं न भवतीत्यर्थः॥ अत्र प्रणवाख्यं नमः पदेनात्पुरा
पदे सत्वं ऽनमो न्वयेन स्वरूपोपायपुरुषार्थाः निष्कृष्य प्रदर्शिताः अथात्व
ऽनन्याहेशेषत्वाकारत्रयमुक्तं भवति २ अथ स्वरूपं स्वरूपानुरूपोपेयप्रार्थना
च मंत्रप्रमेयमिति। तृतीययोजनातामनुस्मरन् प्रणवान्वितनमःशब्दद्विदिता
र्थावादपूर्वकं नारायणपदं व्याचष्टे॥ अकारार्थायैव स्वमहमथ मह्यं न न निमा
वहानरणां नित्यानामयनेमिति नारायणपदं॥ यद्वाहास्मे कालं सकलमपि स
र्वत्र सकलास्ववस्थास्वाविरस्तु मम सहजकैंकर्यविधयः ३॥ इति अहं अकारार्था
य भगवत एव स्वं शेषभूत इति प्रणवार्थानुवादः। अत्राहमितिमकारार्थानुवा

ककारार्थाये त्यकारवाच्यानुवादः। एवकारे लोकार्थानुवादः स्वमिति लुप्त तादर्थ्ये चतुर्थी

दः। अथ अतु इत्यर्थः निपातानामनेकार्थत्वात्। मह्यंमदर्थोमच्छेषभूतः स्वतंत्र इति या
वत्। नभवामि अयंनमःशब्दार्थानुवादः। तत्र मह्यमिति षष्ठ्यंतमकारार्थानुवादः। मह्य
मित्यत्र चतुर्थी कारोक्तस्य षष्ठ्यास्तादर्थ्यज्ञापनार्थं। अथ नारायणशब्दार्थमाह। नरा
णामिति। नाराणामयनमिति षष्ठीतत्पुरुषेण। नारा अयनंयस्येति बहुव्रीहिणा च नार
यणशब्दो निष्पद्यते। रिङ् क्षये इति धातोरन्येभ्योपि दृश्यत इति कर्त्तरि डप्रत्यये तस्यानु
बंधलोपे च निष्पन्नो रशब्दः स्थिरवस्तुवाची तस्य नञर्थेन नशब्देन सुप्सुपेति
समासेन नरशब्द निष्पत्तिः। तेन नशब्देन नित्यवस्तुवाचीनराणां समूहाः नाराः तस्य
समूह इत्यण्। इण् गतौ वीति धातोरयतइत्ययनं अयतेनेनेत्ययनं यंत्यस्मि
न्नित्ययनमिति कर्मकरणाधिकरणार्थेषु कृत्यल्युटो बहुलं। करणाधिकरणयो
श्चेति सूत्रविहितेन ल्युट्प्रत्ययेन निष्पन्नो अयनशब्दाः प्राप्यत्वप्रापकत्वाधारत्व
वाचकाः। ते श्वेतंत्रो बोध्याः ते नारशब्दस्य तत्पुरुषसमासे भगवतश्चेतनान्याप्यप्रापकत्वे
नित्यच्यते। आधारपरत्वेन परत्वमुक्तं भवति। बहुव्रीहिसमासे तस्य सर्वाधारकत्वप्रतिपा
दनात्। सोऽलभ्यमं तर्यामित्वं चोक्तं। पूर्वपदात्संज्ञायामगः इति अयनशब्दनकारस्य णः।

श्री उ वाद॥

त्वां। नित्यवस्तु निच ज्ञानानंदामलत्वादयो दिव्यात्मस्वरूपगुणाः दिव्यविग्रहाः कां
तिसौकुमार्यादयो विग्रहगुणाः दिव्यभूषायुधमहीष्यः दिव्यपरिजनाः श्रीवैकुंठ।
लोकः प्रकृतिपुरुषकालाः महदादिविकाराः अंडान्यंडांतर्गतपदार्थाश्च। अ
त्र ज्ञानादयः कालांताः स्वरूपतो नित्याः। महदादयः प्रवाहतो नित्याः।
इति विवेकः। स्वरूपतो नित्यत्वं नाम सत्वे सत्युत्पत्तिविनाशात्यंताभावः।
प्रवाहतो नित्यत्वं नाम। उत्पत्तिविनाशयोगित्वे सत्येव पूर्वनामरूपानन्यथा
भावः। अत्र नारस्त्विति सर्वपुंसां समूहाः नारो नराणां संघातः। नराज्जा
तानि तत्वानि। आपो नारा इति प्रोक्ताः इत्यादिकमत्रानुसंधेयम्॥ इममर्थ
मभिप्रेत्य नारायणशब्दो व्याख्यायते। नाराणामिति व्याख्येयपदोपदानं
नित्यानामिति तस्य व्याख्यानं निवहाः समूहाः। अनेन नारेत्यत्र नरशब्दो
परितस्य समूह इति सूत्रविहित तस्याणप्रत्ययस्यार्थः उक्तः। अत्रयस्येति
प्रोषपूरणेन। नराणां निवहाः अयनं यस्येति वहुव्रीहिः निवहशब्दस्य ष २३

नत

ध्यंतत्तया विभक्तिपरिणामेन नराणां नित्यानामयनमिति तत्पुरुषश्चाभिसंहि
तः। अयनशब्दस्य नपुंसकतया तत्पुरुषपक्षे परिवद्धिंगत्वं लोकादिति बोध्यं।
समूहार्थतद्धितां तेन नारशब्देन चेतनानां परस्परं भेदः चेतनानां परस्य च भेदः
चेतनाऽचेतनानां च परस्परं भेदः। समासेन स्वराच्चेतनस्य भेदः। अचेतनस्य
स्वराड्भेद इति पंचाविभेदा लभ्यंते। इत्यनेन प्रकारेण तत्पुरुषबहुव्रीहिरूपस
मासद्वयलब्धावयवार्थपुरस्कारेण नारायणपदं प्राप्यत्वेन प्रापकत्वेन समम। स्त
चिदचिदंतर्यामित्वेन परत्वेन सुलभत्वेन च। वेदांतप्रसिद्धं भगवंतमाह ब्रवी
ति तथाहि श्रुतिस्मृतयः ब्रह्मविदाप्नोति परं सोऽश्नुते सर्वान्कामान्सह
ब्रह्मणा विपश्चिता रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति यथा नद्यः
स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यं परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। अ

२४ अश्वइवरोमाणिविधूयपापंचंद्रइवराहोर्मुखात्प्रमुच्य। धूत्वाशरीरमकृतं कृत आत्मा
ब्रह्मलोकमभिसंभवामि। त्यक्त्वादेहंपुनर्जन्मनेतिमामेति सोर्जुन मामेवै
ष्यसि मद्भक्तेषुस्थितानेप्रियोसिमे। मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतमि
ति तमेवंविद्वानमृतइहभवति। नान्यःपंथाअयनायविद्यते। अमृतस्यैषसे
१५ तुः नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन। यमेवैषवृणुतेतेन
लभ्यः तत्पुरुषोमानवस्स एतान् ब्रह्मगमयेत। तमक्रतुंपश्यतिवीतशोकोधातुः
प्रसादान्महिमानमीशं। संसारार्णवमग्नानांविषयाक्रांतचेतसां विष्णुपोतं
६ विनानान्यत्किंचिदस्तिपरायणं। तेषामहंसमुद्धर्तामृत्युसंसारसागरात्। अ
हंस्मरामिमद्भक्तंनयामिपरमांगतिं। इतितद्यथारथस्यारेषुनेमिवदर्पितानाभावा
राअर्पिताःएवमेवैताभूतमात्राःप्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राप्राणेर्पिताः
यस्मिन्द्यौःपृथ्वीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः एतस्यवाक्षरस्य
प्रशागागि सूर्याचंद्रमसौविधृतौतिष्ठतः परमत्वंचसर्वेषामाधारः परमेश्व
नै।

रः। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग
त्. भूतभृन्न च भूतस्थो ममात्मा भूतभावन इति श्रुतेः प्रविश्य शास्ता जनानां सर्वात्मा
श्रुतेः प्रविष्टं कर्तारमेतं। यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य
पृथिवी शरीरं यः पृथिवीमंतरो यमयति स च आत्मा अंतर्याम्यमृत एवं यः आत्मनि
तिष्ठन्नित्यादि यः पृथिवीमंतो संचरन्नित्यारभ्य एष सर्वभूतांतरात्मा पहतपा।
प्मा दिव्यो देव एको नारायण इत्यंता सुबालोपनिषत् श्रुतेर्बहिश्चांत तत्सर्वं व्याप्य।
नारायणः स्थितः सर्वत्रासौ समस्तं च। यत्किंचित्सृज्यते येन। सर्वस्य चाहं हृ
दि संन्निविष्टो। ईश्वरः सर्वभूतानां ज्योतिंषि विष्णुर्भुवनानि विष्णुः ... हृ
हृद्यांतमतिसंपतत्रैर्द्यावापृथिवी जनयं देव एकः। तमीश्वराणां परमं महेश्वरं
यस्मात्परं नापरमस्ति किंचित्। सकारणं करणाधिपाधिपः। न तत्समश्चाभ्य
धिकश्च दृश्यते। अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा। परः पराणां परमः
परमात्मात्मसंस्थितः पराणां सकाशान्न यत्र क्लेशादयः संति परावरेशो इमो।

पवित्रं परमानंदं पूर्णं ब्रह्म सनातनं ॥२

स्समुनिशार्दूल किं करोमि समुपस्थितो ॥ तामामाविर्भूतशोकः स्मयमानमुखांबुजः ॥ अहो भाग्य
[illegible] भाग्यं नंदगोपव्रजौकसामिति। अत्रेदमनुसंधेयं। परत्वसौलभ्ययोः सौलभ्यमेव
भगवतः प्रधानभूतो गुणः। परत्वं तु तस्य गुणसंपादनार्थतया अप्रधानभूतं। पर
त्वसौ[illegible]: सौलभ्यमेवाह सौलभ्यगुणाय। अयमर्थः। प्रसादपरमौ नाथौ मम
गेहमुपस्थिताविन्यादि श्रीपराशरसूक्तौ। प्रसादपरमाविति पदं प्रसादः परमो य
योस्ताविति विग्रहेण नाथशब्दोक्तपरत्वापेक्षया आधिक्यं सौलभ्यापरपर्याय
स्य प्रसादस्य वदत्ता सूच्यत इति प्रकृतमनुसरामः यमित्यनेनैव नारायणप
दरूपार्थो विष्णुरिति सूचितं। अस्मै भगवते नारायणपदोपस्थिताय च तुर्थ्य
र्थः तादर्थ्यं तच्च शेषत्वं तत्कैंकर्यगर्भं नाकिंचित्कुर्वतः शेषत्वमिति न्याया
त् तच्च प्रार्थनामंतरेण न लभ्यते इति स्यामिति कैंकर्यप्रार्थना चतुर्थ्यर्थः।
कैंकर्यं चासंकोचात् सर्वदेशसर्वकालसर्वावस्थोचितं सर्वप्रकारं विवक्षि
तमित्यभिसंधायाह कालमित्यादिना। श्लोकशेषेण सकलं कालमित्यत्य
तसंयोगे द्वितीया। सर्वेष्वपि कालेष्वित्यर्थः सर्वत्र सर्वेष्वपि देशेषु सर्वास्वव

स्थासु स्थितिगमनशयनादिषु सर्वास्ववस्थासु मम भगवदनन्यार्हशेषत्वलक्षणस्व
रूपज्ञानवत इत्यर्थः सहजाः शेषत्वस्वरूपानुबन्धिनः कैङ्कर्यविधयः कैङ्कर्यानु
ष्ठानानि कैङ्कर्यस्य सकलविधत्वविवक्षया विधय इति बहुवचनं आविस्युः।
स्वाभाविकत्वेन अविद्यादितिरोधाननिवृत्त्या आविर्भवन्तु। अत्र येनयेनधा
ता गच्छति छायावासित्वमनुगच्छेत् भवांस्तु सहवैदेह्या गच्छ त्वं वनवासाय
सर्वेषु सर्वेषु देशकालेषु अहंकारार्थकामेषु। अनादृतसुतं गेही आराधना
नां सर्वेषां विष्णोराराधनं परं इत्यादिकमत्रानुसंधेयं। भोजनपूर्वभाविन्याः क्षु
धाश्च कैङ्कर्यपूर्वभाविन्याः परमभक्तेरप्याविर्भावोर्थसिद्धः भगवच्छेष
त्वं भागवतपर्यन्तत्वात् भागवतकैङ्कर्याविर्भावोर्थसिद्धः ते च कैङ्कर्यविधयः
स्तत्त्वभाष्यकृता विस्तरेण दर्शितास्तत्रैव द्रष्टव्याः। तथा त्वहं विष्णोरेव शेषभूतो
न मम सर्वशेषिणो नारायणायैव सर्वदेशसर्वकालसर्वावस्थोचिताशेषशेष
रँ तैकरतिस्तव चैवेयं पुण्डरीकाक्ष त्वमेवैवं कुरुष्व मां इत्यादिकमत्रानुसंधेयं ३
एवं श्लोकत्रयेण मन्त्रार्थदर्शिताः ते च प्रपन्नेन सर्वदानुसंधेयाः। अन्यथा

प्रमादः स्यादित्याशयेनाह॥ देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्यात्तृतीयं।
स्वातंत्र्यांधो यदि स्यात्प्रथममितरशेषत्वधीश्चेद्द्वितीयं॥ आत्मत्राणोन्मुखश्चे
न्नम इति च पदं बांधवाभासलोलः॥ शब्दं नारायणाख्यं विषयचपलधीश्चेच्चतु
र्थीं प्रपन्नः ४॥ इति प्रपन्नः विदिताकारत्रयलक्षणस्वरूपः। देहेसक्तात्मबु
द्धिः देहे सक्ता लग्ना देहविषया आत्मेति बुद्धिर्यस्य तथोक्तः भवति यदि स्याच्चेत्
प्राचीनकर्मवासनानुवृत्तिवशादिति भावः। तृतीयं पदं प्रणवस्थेषु पदेषु
तृतीयं पदं मकारं तदर्थमित्यर्थः। साधु सम्यग्विद्यात् अनुसंदधीतेत्यर्थः
अनुसंधाने सम्यक्त्वं नाम सदातनत्वमिति बोध्यं। मकारस्य जडाचेतनस्थूल
दुःखरूपदेहविलक्षणज्ञानानंदगुणकज्ञानंदस्वरूपाणुपरिमाणस्य वस्तु
नो वाचकत्वात्तदर्थानुसंधाने सा बुद्धिर्निवर्त्तते तन्मूलपापानि च न प्रसज्ये
त इति भावः स्वातंत्र्यांधः स्वतंत्रेण स्वस्य स्वाधीनताबुद्ध्या अंधस्तिरोहितभ
गवच्छेषत्वस्वरूपः स्याद्यदि तदा प्रथमं प्रणवे अयं पदं लुप्ततादर्थ्यचतुर्थीक

मकारं साधु विद्यात् तथा च लुप्तचतुर्थिकाकारोत्पन्नभगवच्छेषत्वज्ञानात्स्वातंत्र्यभ्र
मो निवर्त्तते। तेन स्वातिशयाधायकस्वर्गादिसाधनेषु च न प्रवर्त्तत इति भावः न
नु भगवच्छेषत्वज्ञानमात्रेण कथं स्वातंत्र्यभ्रमनिवृत्तिः भगवच्छेषत्वज्ञानानं
तरम पि अहं मम भगवतः अन्येषां च शेष इति भ्रमस्य संभवात्। स्वशेषत्वभ्र
मो हि स्वातंत्र्यभ्रमः। अन्यथा स्वस्य स्वशेषत्वनिवर्त्तकनमः प्रणवान्वयकथ
नवैयर्थ्यादिति चेत्। उच्यते। स्वातंत्र्यभ्रमो हि द्विविधः। अहं ममैव शेष इत्ये
कः। अहं मम भगवतोऽन्येषां च शेष इत्यपरः। तत्राद्यस्याकारोत्पन्नभग
वच्छेषत्वज्ञानान्निवृत्तिर्विवक्षितेति न दोषः। द्वितीयस्वातंत्र्यभ्रमनिरासाय
नमसः प्रणवान्वये विसार्थक इति इतरशेषत्वधीश्चेत् भगवदन्यशेषत्वा
तिमान् यदि। द्वितीयं प्रणवे द्वितीयं पदं उकारं साधु विद्यात् तथा चोकारस्या
वधारणार्थकस्याकारार्थान्वयेन लुप्तचतुर्थ्यर्थ शेषत्वस्य भगवदन्ययो
गव्यावच्छेदकत्वात्। तदर्थानुसंधानेन अन्यशेषत्वभ्रमो देवतान्तरभज

८

नादिकं चेति वर्त्तत इति भावः। आत्मत्राणोन्मुखः। आत्मनः स्वस्य त्राणे रक्षणे उन्मुखः उ
17 द्युक्तः साधनांतरस्वीकारदशेस्वेत्। तदानमइतिपदं सखंडनमोन्वितमखंडनमः
पदं अनन्यशरणत्वप्रतिपादकं साधु विधात। तथा च नमःपदार्थानुसंधानेन भग
वानेवममरक्षकोनाहमिति बुद्ध्या साधनांतरेभ्यो निवर्त्तत इति भावः। साधनां
तरप्रवृत्तोनुशायश्चित्तिर्यं सात्रयत्नः शरणं व्रजेदिति विहितपूर्वप्रपदनस्मरणा
रूपं प्रायश्चित्तमनुष्ठेयमिति तात्पर्यं। चकारस्स खंडाखंडनमसोरितरेतरयो
गं प्रतिपादयति। बंधव एव बांधवाः बंधवा इव आभासंत इति बांधवाभासाः
आपद्यतिकाः संपदि सर्वस्वापहारिणः शरीरसंबंधिनः तेषु लोलः आसक्तश्चे
त् लोल इत्यनेन अस्यैव तेषु प्रावण्यं न तु तेषामस्मिन्निति सूचितं। तदाना
रायणस्यास्य नारायणस्तोत्यात्योपुरुषोपेक्षितं तथोक्तेश्च दं साधु विधात। चतुर्थ्याः
पृथगनुसंधेयत्वस्य वक्ष्यमाणत्वात् अत्र प्रादिकमात्रस्य स्वमभ्यकं यनाथ पदं
मार्थ्याशब्दः अत्र एवशब्द इत्युक्तेन लुप्तमिति विभक्त्यं तहिपदं तथा च

नारायणशब्दो माता पिता भ्राता निवासः शरणं सुहृद् इत्युक्तरीत्या। निरुपाधिक
सकलविधिबंधुत्वं भगवतः प्रतिपादयति। इति तदर्थानुसंधानेन देहानुबं
धोपाधिकबंधुषु लोलत्वं निवर्त्तते। ननु कथं नारायणपदेन भगवत्सकलविधि
बंधुत्वप्रतिपादनमिति चेदुच्यते। तत्पुरुषसमासे कर्मणि ल्युडंतेनायनशब्देन भ
गवतः प्राप्यत्वं प्रतिपाद्यते। प्राप्यत्वं चासंकोचेन सर्वप्रकारेणाविवक्षितं। बंधु
त्वेनापि प्राप्यांतर्गतः। ततश्च परिपूर्णतया संपद्य विकिंचित्कारस्य निरपेक्ष
त्वात्। महत्पापादिसंप्राप्ते स्मर्त्तव्यो भगवान्हरिरित्युक्तरीत्या स्वाश्रितानां सकल
पापनिवर्त्तकत्वस्य ब्रह्मरुद्रादिगजेंद्रादीनां वेदापहारादिपापत्सु दृष्टत्वान्नि
निरूपाधिसकलविधिबंधुत्वसिद्धिरिति विषयेषु शब्दस्पर्शादिषु विहि। तन्निवृ
त्तरूपे दैहिकेष्वामुष्मिकेषु च चपलत्वाभिलाषाधीर्यस्य स तथोक्तश्चेत्। चतु
र्थीनारायणपदोपरिस्थितां सर्वडेनमःपदान्वितां त्यक्त्वा चतुर्थीं गुणानुभवज
नितप्रीतिकारितसर्वदेशसर्वकालसर्वावस्थोचितनित्यकैंकर्यरतिशय

ऽयोग्य भगवन्कैंकर्य्यप्रार्थना प्रकाशिकां साधु विधात्। तेनैतदितरसुखत्वव
जनतः परित्यागिति विरसदुःखवद्धुलचंचललेहयसकलविषयविमुखो भवती
18 ति भावः। ननु कथं चतुर्थ्यर्थानुसंधानेन विषयांतरप्रवणस्य निवृत्तिः। नमः
शब्दान्वयेपि कैंकर्य्यस्वार्थत्वबुद्धिमात्रस्यैव निवृत्तिरिति चेदुच्यते। न
मः पदनिवर्त्यं कैंकर्य्यस्य स्वार्थत्वं नाम स्वातिशयाधायकत्वं। तथाच
शेषातिशयाधायकस्यापि स्वार्थस्य तदेकशेषत्वस्वरूपविरुद्धत
या नमः पदेन निवृत्तिश्चेत्। केवलस्वार्थतयात्यंतस्वरूपविरुद्धस्य वि
षयांतरस्य निवृत्तिर्दंडापूपिकान्यायसिद्धा। तथाच भगवदेकातिशयाधायके
तरभोगराहित्यलक्षणमनन्यभोगत्वं। नमःपदान्वितचतुर्थ्यार्थाल्लभ्यमि
ति द्रष्टव्यं। एतत्सर्वमधिकारिविशेषणानि यत मिलित्वा संधाय प्रपन्न इत्युक्तं॥ भ स्य
क्तिनिष्ठस्याप्यंगप्रपत्तिसद्भावेपि प्रधानेनैव हि व्यपदेशा इति न्यायेन तस्य न प्रप
२ब्य न्नशब्दव्यपदेश्यत्वं किंतु प्रपत्तिनिष्ठस्यैवेति प्रपन्नस्यैव विहितविषयत्यागः भक्ति २७
निष्ठस्य तु अविना प्रतिषिद्धविषयत्यागमात्रं। विहितविषयस्तु तस्यापि धर्म्म

बुद्ध्या उपादेय एव तस्य कृतात्रयावश्यतया त्रिरिति: कृशो वा जायते · कृतानि त्रिराय
पाहृत्येत्युक्तेरित्या तदपाकरणस्यावश्यकर्तव्यत्वात् सूचितं चैतद्भगवता जैमि
निना ब्रीहिरणस्य सोमविद्यां प्रजमणावाक्ये संगादिति। प्रपन्नस्य यथा न कृताव
श्यता तथा प्रागेवोक्तं। किंच प्रपन्नस्य विहितविषयापादानमनन्यशरणत्वस्वरू
पविरुद्धं। भोग्यताबुद्ध्या तदुपादानं चानन्यभोग्यत्वस्वरूपविरुद्धमिति सर्वथा
स्याधिकारिणो विहितविषयत्यागः एववर्णाश्रमोचि[illegible]कर्मणामिति। आनृशं
स्यात्तदुपादानमिति चेत् अनेनाधिकारिणान्यकेपि विहितविषये लोकानां
रागादेव प्रवृत्तिसंभवात्। विहितस्य कथं त्याग इति चेत। सत्यं तद्द्विधं: कृतात्रया
पकरणार्थं तयाश्रस्य तदवश्यत्वाभावात् प्रपन्नत्वेन संप्रति प्रपन्नानामपि
क्वचिद्विषयांतरे प्रवृत्तिर्दृश्यमाणा आपाय सप्रवेसद्यः प्रायश्चित्तं समाचरेत् प्रा
यश्चित्तिरियं सात्रयत्पुनः शरणं व्रजेत्युक्तरीत्या वा आनृशंस्यमूलकप्रतिपदोक्त
प्रायश्चित्तेन वा नोध्या। अकृतप्रायश्चित्तानु कौटिल्ये सति श्रीनयापन्नप्रपन्न
लघुदंड प्रपन्नस्य राजपुत्रापराधवत् इत्युक्तरीत्या लघुदंडोपनोदैवेत नतु स्वरूप

याथात्म्यज्ञानवतः प्रपन्नस्य कथं देहात्मभ्रमादिसंभवः। यन्निवृत्तये मंत्रावयवा
र्थानुसंधानं विधीयते। अधिष्ठानयाथात्म्यज्ञानं हि भ्रमोत्पत्तिविरोधीति चेन्न
नैवं शास्त्रजन्योत्पन्नचंद्रैकत्वज्ञानवतोपि तिमिरादिदोषानुवृत्त्या पुनश्चंद्रद्वित्वभ्र
मानुवृत्तिवदनादिविपरीतवासनारूपदोषानुवृत्त्या देहात्मभ्रमाद्यनुवृत्तिसंभवा
त्। तथा चानवरतमंत्रार्थानुसंधानेन सा निवर्त्तनीया। अत्रेदमप्यनुसंधेयं। इ
त्थमनवरतमंत्रार्थानुसंधानेन केवलमनुसंधातुरेवाविरोधिनिवृत्तिः। अपि तु त
द्वासदेशवासिनामपि तन्निवृत्तिर्भवति। तथा हि स्मरंति। यत्राष्टाक्षरसंसिद्धो
महाभागो महीयते। न तत्र संचरिष्यंति व्याधिदुर्भिक्षतस्करा इति। अष्टाक्षरसंसि
द्धः। अष्टाक्षरजनितसम्यक्ज्ञानवानित्यर्थः। व्याधिजन्मजरामरणाद्यापादकवि
षयांतरप्रावण्यमिति न हि बहव इमेस्मिन्पुरुषे कामा नानात्यया व्याधिभिः परिपू
र्णोऽस्मि इत्युक्तप्रकारोक्तो व्याधिश्चातुर्थिकज्वरः दुर्भिक्षः क्षामः स्वरूपज्ञानक्षाम इत्य
र्थः। तस्करश्चोरः आत्मापहारी। योन्यथा संतमात्मानमन्यथा प्रतिपद्यते। किं
तेन न कृतं पापं चोरेणात्मापहारिणा इति स्मृतेः सर्वमष्टाक्षरांतस्थं रत्युक्तरीत्या